RKMVU/Int MA/San/12-17/D2014/SK-101

## **SK**-101 - कठोपनिषत् शाङ्करभाष्यसहिता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) चत्वारो मन्त्राः पूर्यन्ताम्।** **1x4=4**

1) सूर्यो यथा सर्वलोकस्य.............॥
2) यः पूर्वं तपसो............॥
3) विज्ञानसारथिः..................॥
4) नैव वाचा न...............॥
5) पीतोदका.................॥
6) जानाम्यहं...............॥

**B) षण्णां वाक्येनैकेन उत्तरं लिखत।** **1x6=6**

1) नाचिकेताग्निः कीदृक् ?
2) के दन्द्रम्यमाणाः परियन्ति ?
3) तितीर्षताम् अभयं पारं किम् ?
4) आत्मशब्दव्युत्पत्तिप्रदर्शकं श्लोकम् उल्लिखत ?
5) न प्राणेन नापानेन मर्त्यो जीवति कश्चन। तर्हि केन जीवति ?
6) यदा पञ्चावतिष्ठन्ते ज्ञानानि... इत्यादि मन्त्रे ज्ञानानि इत्यस्यार्थः कः ?
7) कः कथम् इन्द्रियाणां हननं कृतवान् ?
8) नचिकेतसः पिता कः? कुतः स कुपितः?

**C) यथेच्छं पञ्च भाष्यदिशा विवृणुत।** **3x5=15**

1) सर्वाणि ज्योतींषि कथं विभान्ति ?
2) बुद्धेः परः कः, कथं स परः ?

3) कं मत्वा धीरो न शोचति ?

4) बालं प्रति किं न भाति, कुतः ?

5) अतिदीर्घे जीविते कोऽपि न रमेत, किमर्थम् ?

6) कः मृत्योः मृत्युम् आप्नोति ?

7) अनन्दनामानं लोकं कः गच्छति ?

**D) यथास्पृहं त्रीन् मन्त्रान् भाष्यदिशा व्याख्यात।** **5x3=15**

1) न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात्॥

2) येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः॥

3) उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति॥

4) पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम्।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते॥

5) इन्द्रियाणां पृथग्भावमुदयास्तमयौ च यत्।
पृथगुत्पद्यमानानां मत्वा धीरो न शोचति॥

**E) एकम् उत्तरत।** **10x1=10**

1) संसारवृक्षस्वरूपं भाष्यस्वारस्येन प्रपञ्चयत।

2) ओङ्कारमहिमानम् वर्णयत।

***

RKMVU/Int MA/San/12-17/D2014/SK-102

**SK-102 – केनमुण्डकोपनिषदौ शाङ्करभाष्यसहिते**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

---

**A) यथेच्छं दश एकेन वाक्येन उत्तरत।** **1x10=10**

1) अक्षरात् परः इत्यत्र अक्षरपदस्य कोऽर्थः?

2) अनित्याक्षरपदावसानानि कानि ?

3) सर्वगतमपि ब्रह्म हृदये अस्ति न मन आदिषु इति कुत उच्यते ?

4) ब्रह्मपुरं नाम ब्रह्मलोको वा? स्वर्गः? उभावपि न वा ?

5) गुरुमेवाभिगच्छेत् इत्यत्र अवधारणार्थः कः?

6) यज्ञप्लवान् के अभिनन्दन्ति ?

7) ब्रह्मा कैः सर्वान् अतिशेते ?

8) मुण्डकोपनिषत् ऋग्वेदे अन्तर्भवति वा ?

9) वाचो ह वाचम् इत्येतदनुरोधेन प्राणस्य प्राणमिति कुतो न विपरिणाम्यते ?

10) न वाग्गच्छति कुतः?

11) येनाहुर्मनो मतम् इति मन्त्रभागस्य कोऽर्थः?

12) भूतेषु भूतेषु विचित्य इत्यस्य कोऽर्थः ?

**B) यथास्पृहं पञ्च समासेन समाधत्त।** **3x5=15**

1) तस्माच्च देवा बहुधा सम्प्रसूताः इत्यादिमन्त्रं विवृणुत।

2) कः कदा निरञ्जनः सन् परमं साम्यं लभते?

3) ऊर्णनाभ्याद्युदाहरणेन सृष्टिं प्रतिपादयत।

4) अविद्यायामन्तरे वर्तमानाः इत्यादिमन्त्रं विवृणुत।

5) विद्वान् उपसन्नाय किं कुर्यात् ? मन्त्रोक्तरीत्या दर्शयत।

6) यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते इति मन्त्रभागस्य क आशयः?

7) केनोपनिषन्मते केषु सत्सु ब्राह्मी उपनिषत् प्रतिष्ठिता भवति ?

**C) यथेच्छं त्रीणि विशदयत।** **5x3=15**

1) मुण्डकभाष्योक्तम् अनुबन्धचतुष्टयं निरूपयत।

2) द्वा सुपर्णा सयुजा इत्यादिमन्त्रं भाष्यदिशा विशदयत।

3) दिव्यो ह्यमूर्तः पुरुषः इत्यादिमन्त्रं भाष्यगन्धिलतया विवृणुत।

4) अपरविद्यां विवृत्य यस्याग्निहोत्रमदर्शम् इत्यादिमन्त्रं भाष्यदिशा विशदयत।

5) तदेतत्सत्यमित्यादिमन्त्रं भाष्यमनुसृत्य विवृणुत।

**D) अभीष्टम् एकम् उत्तरत।** **10x1=10**

1) अपरविद्यादोषान् उद्भाव्य लोकपरीक्षापूर्वकं गुरूपसदनं ब्रह्मजिज्ञासां च प्रतिपादयत।

2) प्रतिबोधविदितं मतम् इत्यत्र विविधं मतं समीक्ष्य सिद्धान्तमतम् उपस्थापयत।

***

RKMVU/Int MA/San/(10-15)+(11-16)/D2014/SK-104

**SK-104 - बृहदारण्यकोपनिषदि तृतीयचतुर्थाध्यायौ सशांकरभाष्यौ**

कालावधिः - होराद्वयम्   पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) कस्य काण्डस्य आगमप्रधानत्वम्?

2) अष्टसंख्याकाः ग्रहातिग्रहाः के?

3) नित्यकर्मणां वेदान्तदिशा किं फलम्?

4) याज्ञवल्क्यं प्रति उषस्तः किमिति पप्रच्छ?

5) तृतीयस्य पञ्चमब्राह्मणे कयोः संवादो वर्तते?

6) तृतीयषष्ठब्राह्मणदिशा गार्ग्याः प्रश्नतात्त्पर्यं किम्?

7) अन्तर्यामिब्राह्मणं किमर्थम् आरभ्यते?

8) अक्षरब्रह्मणः निरुपाधिकत्वे किं श्रुतिप्रमाणम्?

9) निविन्नाम्ना किमभिप्रेतम्?

10) श्रोत्रब्रह्मोपासनायाः प्रतिष्ठात्वेन किं प्रोक्तम्?तच्च केन नाम्ना उपासीत?

11) "किमन्यदहं विद्यानिष्क्रयार्थं प्रयच्छामि, साक्षादात्मानमेव दत्तवते"भाष्यदिशा कः कस्मै वदति?

12) "मा भगवान् मोहान्तमापीपिपत्" इति कुतः मैत्रेयी उवाच?

B) **सप्तसु पञ्चानां मन्त्रपूरणं विधाय तदर्थं विस्तारयत।** **3x5=15**

1) कतम आदित्या------- तस्मादादित्या इति।

2) तद् वा एतदक्षरं गार्ग्यदृष्टं ------- प्रोतश्चेति।

3) एतस्य वा अक्षरस्य ------ तिष्ठतः।

4) सा होवाच यदूर्ध्वं --------- चेति।

5) स होवाच वायुर्वै ------- भवन्ति।

6) याज्ञवल्क्येति होवाच यत्रायं ------- मृतः शेते।

7) याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होता-------- प्राणभृदिति।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) शाकल्यब्राह्मणानुसारं देवताभेदसंकोचविकासाभ्यां ब्रह्मस्वरूपप्रतिपादनम्।

2) कहोलब्राह्मणस्य प्रतिपाद्यार्थः।

3) पारिव्राज्यविधौ कर्मसंन्यासविचारे पूर्वोत्तरपक्षः मैत्रेयीब्राह्मणदिशा।

4) उषस्तयाज्ञवल्क्यसंवादः।

5) आर्तभागब्राह्मणदिशा ग्रहातिग्रहविचारः।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) अशनायादिविनिर्मुक्तं निरुपाधिकं ब्रह्मस्वरूपं अक्षरब्राह्मणदिशा प्रपञ्चयत।

2) षडाचार्यब्राह्मणदिशा जनकयाज्ञवल्क्यसंवादं सप्रमाणं प्रपञ्चयत।

***

RKMVU/Int MA/San/10–15, 11–16/D14–15/SK–105

**SK–105 – तैत्तिरीयोपनिषत् शाङ्करभाष्योपेता**

कालावधिः – होराद्वयम्     पूर्णाङ्काः – 50

A) **यथाकामं पञ्च मन्त्राः पूर्यन्ताम्।** 1x5=5

1) त्वामेव प्रत्यक्षं ब्रह्मावादिषम्।...............ओं शान्तिः शान्तिः शान्तिः॥

2) धर्मं चर।..............कुशलान्न प्रमदितव्यम्॥

3) प्रजनश्च स्वाध्यायप्रवचने च।.................तद्धि तप–स्तद्धि तपः॥

4) आवहन्ती वितन्वाना।...............लोमशां पशुभिः सह स्वाहा॥

5) मह इत्यन्नम्।.............सर्वेऽस्मै देवा बलिमावहन्ति॥

6) पृथिवी पूर्वरूपम्।..............अथाधिज्यौतिषम्॥

7) अन्तरेण तालुके।.................भूरित्यग्नौ प्रतितिष्ठति॥

B) **वाक्येनैकेन पञ्चानाम् उत्तरं लिखत।** 1x5=5

1) अथातस्संहिताया उपनिषदं व्याख्यास्यामः इत्यत्र अथातश्शब्दयोरर्थः कः?

2) जिह्वा मे मधुमत्तमा इत्यादिवाक्यानां किं तात्पर्यम्।

3) विज्ञानं कथं यज्ञं तनुते ?

4) मनुष्यगन्धर्वाः के ?

5) सत् त्यद् के?

6) महत्तत्वं कस्य कोशस्य प्रतिष्ठा, कुतः?

7) ब्रह्मविद्या किमर्थं प्रस्तूयते?

C) **यथारुचि पञ्च भाष्यदिशा विव्रियन्ताम्।** 3x5=15

1) श्रीकाममन्त्रान् विवृणुत।

2) लक्षणविशेषणयोः कः भेदः?

3) ॐकारोपासनं समासेन विवृणुत।

4) ब्रह्मणः बहुभवनं कीदृशम्?

5) त्रिशङ्कोर्वेदानुवचनं व्याख्यात।

6) दानं कथं कुर्यात् ?

7) पञ्चमस्य षष्ठस्य चानुवाकस्य एकवाक्यता।

D) **स्वच्छन्दं त्रयः समाधेयाः।** 5x3=15

1) व्याहृतयः

2) कोशाः

3) उपसंक्रमणम्

4) भावसाधनो ज्ञानशब्दः इत्यत्र का आपत्तिः?

5) त्रिविधम् आनन्त्यं ब्रह्मणः।

E) **यथाप्रियमेकस्य भाष्यानुरोधिनी टिप्पणी लिख्यताम्।** 10x1=10

1) आकाशादिभूतसृष्टिं वर्णयत।

2) आनन्दमयकोशो न मुख्य आत्मा।

***

RKMVU/Int MA/San/11-16/D2014/SK-132

**SK-132 - ब्रह्मसूत्रे प्रथमाध्याये तृतीयचतुर्थपादौ शांकरभाष्योपेतौ**

कालावधिः - होराद्वयम्          पूर्णाङ्काः - 50

A) **द्वादशसु दश वाक्येन वाक्याभ्यां वा समुत्तरत।** **1x10=10**

1) वदतीति चेन्न... ।
2) विरोधः कर्मणीति... ।
3) गतिशब्दाभ्यां... ।
4) मूलप्रकृति:_ _ _ _ न विकृति: पुरुष:।
5) न तत्र सूर्यो _ _ _सर्वमिदं विभाति।
6) ज्योतिरधिकरणस्य विषयवाक्यं किम्?
7) "नामरूपयोरपि निर्वहणं निरङ्कुशं न ब्रह्मणोऽन्यत्र सम्भवति"- किमत्र श्रुतिप्रमाणम्?
8) प्रसिद्धेश्चेति सूत्रे परमेश्वरस्याकाशशब्दप्रसिद्धिं सूचयन्ती श्रुतिः का?
9) मैत्रेय्यभिप्रायेण केनामृतत्त्वप्राप्तिर्न भवति?
10) अल्पश्रुतेरिति चेदित्यत्र अल्पत्वप्रतिपादिका श्रुतिः का?
11) ब्रह्मविषयः प्राणशब्दः कुत्र प्रसिद्धः?
12) आकाशादिभ्यः सृष्टिः कुत्राम्नायते?

B) **सप्तसु पञ्चानां लघूत्तरं लिखत।** **3x5=15**

1) "अन्यार्थश्च परामर्शः" इति सूत्रस्यार्थं स्पष्टीकुरुत।
2) "मध्वादिष्वसम्भवादनधिकारं जैमिनिः" इति सूत्रस्यार्थं स्पष्टीकुरुत।
3) "प्राणादयो वाक्यशेषात्" इति सूत्रस्यार्थं स्पष्टीकुरुत।
4) दहराधिकरणस्य सूत्राणि यथाक्रमं विलिख्य अधिकरणस्य विषयवाक्यं लिखत।
5) "अविद्याकृतं कार्यप्रपञ्चं विद्यया प्रविलापयन्तस्तमेवैकमायतनभूतमात्मानं जानथ एकरसम्"- भाष्योक्तिं विशदीकुरुत।

6) "अविद्या हि अव्यक्तम्, अविद्यावत्त्वेनैव जीवस्य सर्वो संव्यवहारः सन्ततो वर्तते" – भाष्योक्तिं सिद्धान्तमुखेन विशदीकुरुत।

7) "न हि अनन्तायामविस्तारस्य परमात्मनः अङ्गुष्ठपरिमाणमुपपद्यते"– सप्रसङ्गं सिद्धान्तं समुपस्थापयत।

C) **पञ्चसु त्रयाणामधिकरणसारं समुल्लिखत।** **5x3=15**

1) भूमाधिकरणम्

2) बालाक्यधिकरणम्

3) कम्पनाधिकरणम्

4) चमसाधिकरणम्

5) अर्थान्तरत्वाधिकरणम्

D) **द्वयोरेकं सविस्तरं प्रतिपादयत।** **10x1=10**

1) द्युभ्वाद्यधिकरणं ससूत्रं भाष्योक्तप्रकारेण समुपस्थाप्यताम्।

2) आनुमानिकाधिकरणं ससूत्रं भाष्योक्तप्रकारेण समुपस्थाप्यताम्।

***

RKMVU/Int MA/San/(10-15)+(11-16)/D2014/SK-135

**SK-135 - ब्रह्मसूत्रे तृतीयाध्याये प्रथमद्वितीयतृतीयापादाः शांकरभाष्योपेताः**

कालावधिः - होराद्वयम्        पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) "पञ्चाग्निविद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते" कुतः?

2) ब्रह्मसूत्रस्य तृतीयाध्यायस्य नाम किम्?

3) बादरिमते चरणशब्दार्थः कः?

4) पूर्वपक्षे आत्मनः सेतुत्वं किमभिप्रायकम्?

5) जैमिनिमते कर्मफलदाता कः?

6) परस्य ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशे श्रुतिप्रमाणं किम्?

7) मायामात्रन्तु कात्स्न्र्येन ... इत्यत्र कात्स्न्र्यशब्देन किमभिप्रेतम्?

8) सन्ध्यमित्यस्य भाष्योक्तः अर्थः कः?

9) सिद्धान्ते मूर्च्छावस्थायाः स्वरूपं किम्?

10) सामानाधिकरण्यं चतुर्विधम्- तत्र के ते पक्षाः?

11) मुग्धाधिकरणस्य विशयः कः?

12) सुप्तो जीव एव प्रतिबुध्यते इत्यत्र सूत्रप्रमाणं किम्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) व्याप्तेश्च समञ्जसम्।

2) न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि।

3) परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः।

4) स एव तु कर्मानुस्मृतिशब्दविधिभ्यः।

5) अन्याधिष्ठितेषु पूर्ववदभिलापात्।

6) नातिचिरेण विशेषात्।

7) साभाव्यापत्तिरुपपत्तेः।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) कृतात्ययाधिकरणम्।

2) संध्यधिकरणम्।

3) प्रकृतैतावत्वाधिकरणम्।

4) सर्ववेदान्तप्रत्ययाधिकरणम्।

5) अनिष्टादिकार्यधिकरणम्।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) तदनन्तरप्रतिपत्त्यधिकरणदिशा पञ्चाग्निविद्याविचारमुखेन प्रायणोत्तरं जीवः भूतसूक्ष्मैरसंपरिष्वक्तो गच्छति आहोस्वित्संपरिष्वक्त इति सप्रमाणं निरूपयत।

2) उभयलिङ्गाधिकरणपर्यालोचनया ब्रह्मणः श्रुतिसम्मतं स्वरूपं दर्शयत।

***

RKMVU/Int MA/San/12-17/D2014/SK-151

**SK-151 - पञ्चदश्याम् 1-5 अध्यायाः**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) निदिध्यासनं नाम किम्?

2) समष्टिलिङ्गशरीराभिमानी कः?

3) सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य किं स्यात्?

4) बुद्धेः वृत्तिः कीदृशी?

5) आत्मा परानन्दः कुतः?

6) निर्विकल्पस्य विकल्पाङ्गीकारे को दोषः?

7) एकमेवाद्वितीयम् इत्यत्र विशेषणत्रयेण ब्रह्मणि के भेदाः निवार्यन्ते?

8) सद्वस्तुनः स्वगतभेदः नास्ति। कुतः?

9) कस्य शून्यत्वं दुर्घटम्?

10) कदा अद्वैते धीः स्थिरा भवेत्?

11) सामवेदीयं महावाक्यं किम्?

12) परमात्मन एव जगत्स्रष्टृत्वम् इत्यत्र श्वेताश्वतरवाक्यं किम्?

B) **सप्तसु पञ्चानां श्लोकपूरणं विधाय तदर्थं विस्तारयत।** **3x5=15**

1) स्वतःपूर्णः परात्माऽत्र -----------।

2) द्वैतावज्ञा सुस्थिता -------------।

3) भातीति चेद्भातु नाम-------------।

4) जगतो यदुपादानं----------।

5) सात्त्विकैर्धीन्द्रियैः साकं -----------।

6) प्राज्ञस्तत्राभिमानेन -------।

7) शब्दस्पर्शादयो वेद्याः-------------।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) ज्ञानस्याभेदप्रतिपादनेन नित्यत्वम्।

2) महावाक्यविवेकप्रकरणम्।

3) विद्यारण्यमुनीनां पूर्वाश्रमपरिचयः, तत्कृतग्रन्थाश्च।

4) पञ्चीकरणम्, समाधिविचारश्च।

5) एकमेवाद्वितीयमिति वाक्यार्थः, असद्वादनिराकरणं च।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) कोशपञ्चकं ग्रन्थदिशा निरूप्य "पञ्चकोशविवेकेन लभन्ते निर्वृतिं पराम्" इतीमां ग्रन्थोक्तिं साधयत।

2) आकाशादिपञ्चभूतेभ्यो ब्रह्मणो विवेकं यथाग्रन्थं विशदयत।आकाशस्यानात्मत्वं प्रतिपादयत।

***

RKMVU/Int MA/San/11-16/D2014/SK-163

## SK-163 - वेदान्तपरिभाषा उपमानान्ता

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः** - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) वृत्तिमदन्तःकरणस्य कति भेदाः, के च ते?

2) बुद्धिः का भवति?

3) प्रमाणचैतन्यं किं भवति?

4) विवर्तलक्षणं लिखन्तु।

5) अन्तःकरणस्य सादित्वे किं प्रमाणमस्ति?

6) ईश्वरसाक्षिणः लक्षणं किं भवति?

7) वेदान्तनये परार्थानुमाने कति अवयवाः स्वीकृताः?

8) सुखादिप्रत्यक्षम् इन्द्रियजन्यं तदजन्यं वा?

9) मिथ्यात्वलक्षणं किमस्ति?

10) अन्यमते स्वप्नगजादयः कस्य परिणामाः?

11) सर्वेषामेव...मृषात्मता, इति सम्पूर्णश्लोकं लिखन्तु।

12) यत्साक्षादपरोक्षाद्ब्रह्म, इति वचनं कुत्रास्ति?

B) सप्तसु पञ्च समाधत्त। 3x5=15

1) निरवयवस्यान्तः करणस्य परिणामात्मिका वृत्तिः कथं भवतीति यथाग्रन्थं लिखन्तु।

2) मनोबुद्धिरहंकार... स्मरणं विषया इमे, इति कारिकां विलिख्य सप्रसङ्गं व्याख्या कार्या।

3) वेदान्तानां विशुद्धे ब्रह्मणि तात्पर्यमिति सप्रमाणं विलिख्य, अखण्डार्थत्वं

किमिति लिखन्तु।

4) कामादेरन्तःकरणधर्मत्वे अहमिच्छामि इत्यादिव्यवहारः कथं भवतीति लिखन्तु।

5) जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतया अप्रामाणिकत्वात् इत्यस्याशयं लिखन्तु।

6) अनुमानस्य अन्वयिरूपत्वं प्रतिपाद्य तस्य केवलान्वयित्वं व्यतिरेकित्वं च खण्डयन्तु।

7) उपमानप्रमाणस्य कथं न प्रत्यक्षे अनुमाने वा अन्तर्भावः, इति सप्रमाणं लिखन्तु।

C) पञ्चसु त्रीन् समाधत्त।       5x3=15

1) घटविषयकज्ञानस्य बाधितविषयकत्वेन कथं तस्य प्रमात्वमिति यथाग्रन्थं लिखन्तु।

2) मिथ्यात्वलक्षणं विस्तरेण प्रतिपादन्तु।

3) उपमानप्रमाणविषये यथाग्रन्थं व्याख्यानं कुर्वन्तु।

4) जीवसाक्षिणः ईश्वरसाक्षिणः स्वरूपं विस्तरेण प्रतिपादयन्तु।

5) न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः, इति ग्रन्थभागस्य सप्रसङ्गं व्याख्या कार्या।

D) द्वयोरेकं समाधत्त।       10x1=10

1) ज्ञानगतप्रत्यक्षत्वप्रयोजकं किमस्तीति यथाग्रन्थं विस्तरेण लिखन्तु।

2) शुक्तिरजतस्य साक्षिण्यध्यासे अहं रजतम्, अहं रजतवान् इत्यादिव्यवहारः

कथं नेति विस्तरेण प्रतिपादन्तु।

***

RKMVU/Int MA/San/10-15/D2014/SK-167

# **SK**-167 - सिद्धान्तलेशसंग्रहे प्रथमपरिच्छेदः

कालावधिः - होराद्वयम्  पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** 1x10=10

1) श्रवणविधौ किं मतं वार्तिकानुसारिणाम्?

2) अनात्मदर्शनेनैव परात्मानमुपास्महे, कस्य वचनमिदम्?

3) परिसङ्ख्याविधेः लक्षणमेकं लिखत?

4) धियश्शुद्ध्यै सङ्कलयामि, किम्?

5) जननहरणी सूक्तिः का?

6) जगदुपादानत्वविचारे विवरणानुसारिणां मतं किम्?

7) ब्रह्मलक्षणविचरे कौमुदीकाराणां किं मतम्?

8) जन्मादिलक्षणत्रयमपि परस्परनिरपेक्षमिति कस्य मतम् ?

9) जागरे व्यष्टिस्थूलशरीराभिमानी कः ?

10) जीवस्य नानात्वे श्रुतिप्रमाणं किम्?

11) विवर्तपरिणामयोः को भेदः?

12) "शुद्धमेव ब्रह्म जगदुपादानम्"इति मते हेतुः कः?

B) **सप्तसु पञ्च समाधत्त।** 3x5=15

1) वेदान्तश्रवणे प्रकटार्थकारस्य मतं किम् ?

2) प्रतिबन्धनिरासं प्रति श्रवणादीनां नियमविधिः इति निरूपयत।

3) श्रवणवाक्ये परिसंख्याविधित्वमिति उपपादयत।

4) ब्रह्मलक्षणविचारे कौमुदीकाराणां मतं व्याख्यात।

5) विवर्तपरिणामवादयोर्भेदं सलक्षणं स्पष्टयत ।

6) सविशेषानेकशरीरैकजीववादः कः?

7) जीवानेकत्वविचारं निरूपयत।

C) **पञ्चसु त्रीन् समाधत्त।** 5x3=15

1) मायायाः जगत्कारणत्वविचारे मतभेदः।

2) श्रवणविधेः नियमविधित्वम्।

3) ब्रह्मणो जगदुपादानत्वविचारः।

4) ब्रह्मघटककर्तृत्वविचारः।

5) ईश्वरस्य सर्वज्ञत्वविचारः।

D) **द्वयोरेकं समाधत्त।** 10x1=10

1) नियमपरिसंख्याविध्यभावादिपक्षमाश्रित्य श्रवणविधिविचारं सप्रमाणं कुरुत।

2) जीवैकत्वनानात्वविचारं ग्रन्थदिशा सप्रमाणं विस्तारयत।

***

RKMVU/Int MA/San/10-15/D2014/SK-171

**SK-171 - अद्वैतसिद्धिः आदितो दृश्यत्वहेतुविचारान्ता**

कालावधिः - होराद्वयम्        पूर्णाङ्काः - 50

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) मङ्गलोक्तः विष्णुः कः?

2) प्रतिपन्नोपाधौ त्रैकालिकनिषेधस्य तात्त्विकत्वे कः दोषः?

3) ग्रन्थकारस्य गुरवः के?

4) मधुसूदनः किमर्थं ग्रन्थं रचयामास?

5) भेदाभेदवादिप्रयुक्तम् अनुमानं किम्?

6) किं नाम सिद्धसाधनम्?

7) विभुत्वं नाम किम्?

8) निषेधस्य निषेधे प्रतियोगिसत्त्वं कुत्र?

9) द्विविधा अवस्थितिः कीदृशी?

10) चित्सुखाचार्याभिमतं मिथ्यात्वलक्षणं किम्?

11) ज्ञानवर्त्यत्वविवक्षायाम् अतिव्याप्तिः कुत्र?

12) प्रमाणसिद्धत्वमित्यत्र प्रमाणत्वं नाम किम्?

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) उपपादनं च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवति।

2) सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं धर्मद्वयम्।

3) मोक्षं प्राप्त इव स्वयं विजयते।

4) स्वाप्नार्थस्य स्वप्ननिषेधेन बाधदर्शनात्।

5) न च तत्र लौकिकपरमार्थरजतमेव स्वरूपेण निषेधप्रतियोगीति वाच्यम्।

6) अवस्थितिश्च द्वेधा।

7) मिथ्यात्वमिथ्यात्वेऽपि प्रपञ्चसत्यत्वानुपपत्तेः।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) मिथ्यात्वे विप्रतिपत्तिः, तत्प्रयोजनं च।

2) नव्यन्यायदिशा पक्षता।

3) द्वितीयमिथ्यात्वविचारस्य तात्पर्यार्थः।

4) पञ्चममिथ्यात्वविचारः।

5) मिथ्यात्वस्य मिथ्यात्वविचारः।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रथममिथ्यात्ववादं सपूर्वोत्तरपक्षं सप्रमाणं व्याख्यात।

2) चतुर्थमिथ्यात्वलक्षणस्य सविस्तरं विचारं कुरुत।

***

RKMVU/Int MA/San/12-17/D2014/SK-205

**SK**-205 – **वैयाकरणसिद्धान्तकौमुद्याम् अजन्तपुंलिङ्गप्रकरणाद् अव्ययप्रकरणं यावत्**

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

A) **द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः–** 1x10=10

1) 'जस्' इत्यत्र जकारस्य इत्संज्ञा केन सूत्रेण।

2) उभशब्दः कुतः नित्यं द्विवचनान्तः।

3) स्वादिष्वसर्वनामस्थाने इति सूत्रेण किं विधीयते ।

4) 'कुमार्यौ' अत्र यण् केन सूत्रेण ।

5) 'क्रोष्टा' इत्यत्र उपधादीर्घः केन सूत्रेण।

6) "औतोऽम्शसोः" इत्यत्र पदच्छेदः कथम्।

7) हे अम्बाडे इत्यत्र ह्रस्वः कुतः।

8) सखी इत्यत्र अनङ्णित्वे न। कुतः।

9) ज्ञाने इत्यत्र अकारलोपप्राप्तिः केन सूत्रेण।

10) हे वारे इति कथं रूपम्।

11) झलीति निवृत्तम्। कुतः।

12) शसो न इति कस्यापवादः।

B) **षट्प्रश्नेषु चतुर्णां समाधानं लिखत–** 2x4=8

1) रामाणाम् इत्यत्र सुपि च इति दीर्घः कुतः न प्रवर्तते। नामि कथं प्रवर्तते।

2) कथं 'दुर्धियः' इत्यत्र यणादेशः।

3) अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षतृहोतृपोतृप्रशास्तृणाम् इति सूत्रे नप्त्रादिग्रहणं किं ज्ञापयति।

4) योत्तरा सा पूर्वा यस्याः उन्मुग्धायाः तस्यै इति विग्रहे किं रूपम्। कुतः।

5) प्रधीशब्दस्य रूपभेदः कथम्।

6) नुम्विधौ आत् इत्यधिकारस्य प्रयोजनं किम्।

C) **षट्सु चतुर्णां रूपाणि साधयत–** 3x4=12

1) रामाणाम्
2) यूष्णा
3) सखा
4) रमया
5) ज्ञानानि
6) त्वया

D) **त्रिषु द्वयोः सूत्रयोः व्याख्यानं कुरुत–** 5x2=10

1) "कृत्तद्धितसमासाश्च।"
2) एरनेकाचोऽसंयोगपूर्वस्य
3) तदोः सः सावनन्त्ययोः।

E) **द्वयोः एकस्य समाधानं कुरुत–** 10x1=10

1) निर्जरसा' इत्यत्र मतभेदं प्रदर्श्य खण्डयत ।
2) अतिस्त्रिशब्दस्य पुंसि नपुंसके च कथं रूपाणि।

***

# SK–216 – सिद्धान्तकौमुद्यां तद्धितप्रकरणे पूर्वार्धः

कालावधिः – होराद्वयम्                                                                                    पूर्णाङ्काः – 50

---

A) **विंशतेः स्वल्पैः शब्दैः समाधानं कुरत।**     1x20=20

1) “कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु” इत्यनेन कः प्रत्ययः विधीयते?
2) पूर्वेषुकामशम्यां भवः इत्यत्र किं रूपम्?
3) “गहादिभ्यश्च” इत्यनेन कः प्रत्ययः विधीयते?
4) “विभाषाऽमनुष्ये” इति सूत्रास्यार्थः कः?
5) श्रविष्ठाफल्गु० इति सूत्रं पूरयत।
6) कुक्कुटीशब्देन कः अर्थः लक्ष्यते?
7) “नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्” इत्यस्यार्थः कः?
8) केभ्यः फलप्रत्ययस्य लुप्स्यात्, केन सूत्रेण?
9) अभिजनशब्दस्य कोऽर्थः?
10) “कस्येत्” इति सूत्रस्यार्थः कः?
11) विकारावयवप्रत्ययस्य फले लुक् केन सूत्रेण?
12) आक्षिकः इत्यस्यार्थः कः?
13) द्वन्द्वाच्छ इत्यस्यार्थः कः?
14) शुक्रियम् इत्यत्र कः प्रत्ययः केन विधीयते?
15) गार्भिणम् इत्यस्य कः अर्थः?
16) सौभद्रः इत्यस्यार्थः कः?
17) मतोश्च बह्वजङ्गात् इत्यस्यार्थः कः?
18) कुमुद्वान् इत्यत्र मतोः मकारस्य वकारः केन सूत्रेण विधीयते?
19) गोत्रसंज्ञाविधायकं सूत्रमेकं लिखत।
20) ढक्प्रत्ययविधायकं सूत्रमेकं लिखत।
21) तद्राजसंज्ञाविधायकं सूत्रमेकं लिखत।

22) कुर्वादिभ्यः कः प्रत्ययः भवति?

23) केभ्यः तद्राजस्य लुक् न स्यात्?

B) **पञ्च प्रक्रियापुरस्सरं साधयत।** 3x5=15

गार्गीयाः, प्रबाहनेयः, दैवयज्ञ्या, नैषादकर्षुकः, श्वस्तनम्, सायन्तनम्, श्वाभस्त्रिः।

C) **एकं समाधत्त।** 5x1=5

1) वैयासकिः इति रूपं साधयत।

2) "घञः सास्यां क्रियेति ञः" इति सूत्रं व्याख्यात।

D) **एकं समाधत्त।** 10x1=10

1) "एको गोत्रे" इति सूत्रं व्याख्यात।

2) शर्करा सन्ति अस्मिन् इत्यस्मिन्नर्थे किं रूपम्।

***

RKMVU/Int MA/San/(10-15)+(11-16)/D2014/SK-218

**SK**-218 – **सिद्धान्तकौमुद्यां तद्धितप्रकरणे प्राग्घितीयात् द्विरुक्तं यावत्** (1626-2150)

**कालावधिः** – **होराद्वयम्** **पूर्णाङ्काः** – 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) सर्वधुरीणः इत्यस्य को विग्रहः कश्चात्र प्रत्ययः।

2) वशं गतः इत्यनेन सूत्रेण कः प्रत्ययो भवति।

3) पद्याः इत्यस्य को विग्रहो भवति।

4) पारायणिकः इत्यस्य को विग्रहः।

5) चान्द्रायणिकः इत्यस्य को विग्रहः।

6) समीनः इत्यस्य को विग्रहः।

7) भावः इत्यस्य कोऽर्थः।

8) स्त्रियः भावः इति विग्रहे किं किं रूपं भवति।

9) स्वाङ्गेभ्यः प्रसिते इत्यनेन कः प्रत्ययो भवति।

10) एकाच्च प्राचाम् इत्यनेन कः प्रत्ययो विधीयते।

11) ह्रस्वे इत्यनेन सूत्रेण कः प्रत्ययो विधीयते।

12) किमश्च इत्यनेन कस्मिन्नर्थे कः प्रत्ययो भवति।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) अधुना, दीनीं च इत्यनयोः सूत्रयोः व्याख्यानं कुर्वन्तु।

2) तद्वहति रथयुगप्रासङ्गम् इति सूत्रस्य सोदाहरणं व्याख्यानं कुर्वन्तु।

3) सतीर्थ्यः, समानोदर्यः, सोदर्यः इति त्रयाणां सिद्धिः कार्या।

4) नान्तादसंख्यादेर्मट् इत्यस्य सोदाहरणं व्याख्या कार्या।

5) ऊषसुषिमुष्कमधो रः इत्यस्य सोदाहरणं व्याख्यानं कुर्वन्तु।

6) दक्षिणाहि, दक्षिणा, उत्तराहि इति त्रयाणां सिद्धिः कर्तव्या।

7) वत्सतरः, उक्षतरः, अश्वतरः इति त्रयाणां सिद्धिः कार्या।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) एतदस्त्रतसोस्त्रतसौ चानुदातौ,इत्यस्य सोदाहरणं यथाग्रन्थं व्याख्या कार्या।

2) लोमादिपामादिपिच्छादिभ्यः शनेलचः इत्यस्य सोदाहरणं व्याख्यानं कुर्वन्तु।

3) खलयवमाषतिलवृषब्रह्मणश्च इत्यस्य सम्पूर्णोदाहरणं पूर्वकं व्याख्यानं कुर्वन्तु।

4) दामान्यादित्रिगर्तषष्ठाच्छः इत्यस्य सोदाहरण यथाग्रन्थं व्याख्यानं कुर्वन्तु।

5) कंशंभ्यां वभयुस्तितुततयसः इत्यस्य सोदाहरणं व्याख्या कार्या।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) तदस्यास्त्यस्मिन्निति मतुप् इत्यस्य विस्तरेण व्याख्या कार्या।

2) एकं बहुव्रीहिवत् इत्यस्य विस्तरेण यथाग्रन्थं व्याख्या कार्या।

**RKMVU/Int MA/San/10-15/D2014/SK-227**

**SK-227 - सिद्धान्तकौमुद्यां पूर्वोत्तरकृदन्तप्रकरणे उणादिवर्जे**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

A) **पञ्चदश समाधत्त।** 1x15=15

1) शिल्पिनि ष्वुन् इति सूत्रस्य वृत्तिं लिखत।
2) वयसि च इति सूत्रस्य उदाहरणं किम्?
3) आत्मम्भरिः इत्यत्र विग्रहः कथं कश्च प्रत्ययः?
4) मितनखे च इति सूत्रस्य उदाहरणं लिखत।
5) विहगः इत्यत्र विग्रहः कथं कः प्रत्ययः केन च?
6) करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि केन सूत्रेण?
7) क्षियो दीर्घात् इति सूत्रस्यार्थं लिखत।
8) अञ्चितः इत्यत्र इट् केन शास्त्रेण।
9) मृषस्तितिक्षायाम् इति सूत्रस्य उदाहरणमेकं प्रदत्त।
10) अभ्यर्णमित्यस्य कोऽर्थः?
11) द्यतिस्यतिमास्थामिति किति इत्यनेन विधीयमान इकारान्तादेशः कस्यापवादः?
12) अलङ्करिष्णुः इत्यत्र कः प्रत्ययः, केन?
13) क्नुयीता इत्यत्र कथं न युच्?
14) यायावर इत्यत्र कः प्रत्ययः, केन च?
15) वास्तव्यः इत्यत्र कस्मिन् अर्थे कः प्रत्ययः भवति?
16) चेयम् इत्यत्र केन सूत्रेण यत् प्रत्ययः भवति?
17) आचार्यः इत्यत्र गडमडचरयमश्चानुपसर्गे इत्यनेन अप्राप्ते यत् कथम्?

B) **पञ्च साधयत।** **3x5=15**

1) ब्रह्मभ्रूणवृत्रेषु क्विप् इति सूत्रं व्याख्यात।
2) कृञो हेतुताच्छील्यानुलोम्येषु इति सूत्रं व्याख्यात।
3) संयोगादेरातो धातोर्यण्वत इति सूत्रस्य प्रत्युदाहरणानि लिखत।

4) धृषिशसी वैयात्ये इति सूत्रं व्याख्यात।

5) जुचङ्क्रम्येत्यादिसूत्रं व्याख्यात।

6) क्मरच्–कुरच्–घुरच्–प्रत्ययान् प्रतिपादयत।

C) **द्वयोरुत्तरं देयम्।** **5x2=10**

1) आढ्यसुभगस्थूल इत्यादि सूत्रं प्रपूर्य व्याख्यात।

2) भूतकालाद् भिन्ने क्तप्रत्ययविधानं वर्णयत।

3) स्त्र्यधिकारादूर्ध्वं वाऽसरूपविधिः क्वचिन्न इति व्याख्यात।

D) **एकस्य उत्तरं देयम्।** 10x1=10

1) कृत्यप्रत्ययान् विवृणुत।

2) भावकर्मभ्यां भिन्नार्थे क्तप्रत्ययविधानमाश्रित्य निबन्धं रचयत।

***

RKMVU/Int MA/San/14-19/D2014/SK-236

# **SK**-236 - लघुसिद्धान्तकौमुदी अजन्तपुंल्लिङ्गान्ता

कालावधिः - होराद्वयम्　　　　पूर्णाङ्काः - 50

A) **यथेच्छं दश प्रश्नाः समाधेयाः।** 1x10=10

1) सर्वत्र विभाषा गोः इत्यत्र सर्वत्र इत्यस्य ग्रहणं कुतः?

2) टिसंज्ञाविधायकं सूत्रं तद्वृत्तिं च लिखत।

3) ढ्रलोपे पूर्वस्य दीर्घोऽणः इति सूत्रस्य वृत्तिं सोदाहरणं लिखत।

4) रामात् इत्यत्र मकारोत्तराकारस्य दीर्घः केन सूत्रेण ?

5) रामशब्दस्य प्रातिपदिकसंज्ञा केन ?

6) ओमाङोश्च इत्येतत् कस्य अपवादः?

7) शकन्ध्वादिषु पररूपं वाच्यम् इति वार्तिकस्यार्थः कः?

8) अक्षादूहिन्याम् इति वार्तिकस्य अर्थः कः?

9) एङः पदान्तादति इति सूत्रे पदान्ताद् इत्यस्य प्रयोजनं किम्?

10) अणुदित्सूत्रे कः वर्णः सवर्णं न गृह्णाति, कुतः?

11) स्वौजस्...इत्यादि सूत्रं पूरयत।

12) अङ्गसज्ञाविधायकं सूत्रं तद्वृत्तिं च लिखत।

B) **स्वच्छन्दं सप्तसु पञ्च उत्तरत।** 3x5=15

1) सारङ्गः साराङ्गः इत्यनयोः कः भेदः?

2) सर्वत्र विभाषा गोः इत्यत्र एङन्तस्य इति किमर्थं वक्तव्यम्।

3) यशान् सि - ससूत्रं सन्धिं योजयत।

4) आभ्यन्तरयत्न-तालिकां लिखत।

5) कन्य ऋज्वी - ससूत्रं सन्धिच्छेदं कुरुत।

6) पुंसि सर्वशब्दस्य सर्वाणि रूपाणि लिखत।

7) यथेष्टं पञ्च संज्ञाविधायकानि सूत्राणि लिखत।

C) **यथारुचि त्रयाणां ससूत्रं रूपसिद्धिप्रकारं दर्शयत।** 5x3=15

1) वाक् हरि (सन्धिं योजयत)।

2) रामेषु।

3) रामस्य।

4) सर्वस्मात्।

5) पूर्वस्मिन्।

D) **यथाप्रियम् एकं समाधत्त।** 10x1=10

1) निपात एकाजनाङ्।

2) पुंसि पर्वशब्दस्य प्रथमाबहुवचनम्।

***

## SK-239 - लघुसिद्धान्तकौमुद्यां कृत्तद्धितप्रकरणे

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) यथेच्छं दश समाधत्त। 1x10=10**

1) कृत्संज्ञाविधायकं सूत्रं किम् ?

2) कृत्प्रत्ययाः कस्मिन्नर्थे ?

3) कप्रत्ययविधायकं सूत्रद्वयं लिखत।

4) विदेः परस्य शतृप्रत्ययस्य कः आदेशः ?

5) दृढः। अत्र धातुः कः?

6) लूनः इत्यत्र निष्ठातस्य नः केन सूत्रेण ?

7) कस्य लकारस्य क्वसुप्रत्ययः?

8) विभ्राट्। अत्र कः प्रत्ययः?

9) ईद्यति इत्यस्य कोऽर्थः?

10) रङ्गः इत्यस्यार्थः कः?

11) किति च इति सूत्रेण किं विधीयते ?

12) जनता इत्यस्य कः प्रत्ययः, केन सूत्रेण च विहितः?

B) **स्वच्छन्दं पञ्च समासेन समाधेयाः।** 3x5=15

1) तृन् इति सूत्रं सोदारणं विवृणुत।

2) शतृ-शानच्-प्रत्ययविधायकं सूत्रं सोदाहरणं विवृणुत।

3) कृत्यप्रत्ययाः कति ? के ते ? प्रतिप्रत्ययम् अन्तत एकम् उदाहरणं दत्त।

4) यज-याच...सूत्रं प्रपूर्य सोदाहरणं तदर्थं लिखत।

5) देयम् इत्यस्य रूपसिद्धिप्रकारं दर्शयत।

6) तस्यापत्यम् इति सूत्रस्य अर्थम् उदाहरणं च लिखत।

7) पोरदुपधात् इति सूत्रं सोदाहरणं लिखत।

C) **यथारुचि त्रयाणां रूपप्रक्रियां निरूपयत।** 5x3=15

1) वाहभ्रट्, 2) जनमेजयः, 3) यशस्करी 4) कृतघ्नः 5) अलं दत्वा

D) **यथाकामं सूत्रमेकं व्याख्यात।** 10x1=10

1) समर्थानां प्रथमाद्वा 2) अरुर्द्विषदजन्तस्य मुम्।

***

RKMVU/Int MA/San/(10–15)+(11–16)/D2014/SK–243

## SK–243 – महाभाष्ये 8, 9 आह्निकानि समर्थाह्निकं च

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः–** 1x10=10

1) स्थानिवद्भावनिवर्तकः पुरुषारम्भः कः।

2) आदेशिन्यल्विधिप्रतिषेधे के दोषाः।

3) अविशेषेणालाश्रये प्रतिषेधः इति चेत् कुत्र दोषः।

4) वधकः इत्यत्र कुतः न वृद्धिः।

5) अचः परस्मिन्निति सूत्रे विधिग्रहणस्योदाहरणं किम्।

6) अचः परस्मिन्नित्यत्र केन कारणेन उत्सर्गलक्षणानामनुदेशः कर्तव्यः।

7) स्थूलादीनां यणादिलोपेऽवादेशः किमर्थं वक्तव्यः।

8) पारिखीयः इति कस्योदाहरणम्।

9) संयोगादिलोपे दोषस्य किमुदाहरणम्।

10) लोपसंज्ञायामितरेतराश्रयः कथं वारितः।

11) समर्थसूत्रे पदविधिः इत्यत्र का षष्ठी।

12) समर्थशब्दस्य व्यपेक्षासामर्थ्ये कथं विग्रहः।

**B) सप्तसु पञ्चानामुत्तरं लिखत–** 3x5=15

1) अल्विधौ स्थानिवद्भावप्रतिषेधस्य ज्ञापकं वर्णयत।

2) स्थान्यादेशभावः किमर्थं नित्येष्वनुपपन्नः।

3) वैय्याकरणः,सौवश्वः इत्यत्र प्राप्तं दोषं निवारयत।

4) न वा संयोगस्यापूर्वविधित्वात्।

5) उपधात्वे स्थानिवद्भावनिषेधस्योदाहरणं दर्शयत।

6) व्यपेक्षासामर्थ्ये अधिकारे च के दोषाः ।

7) आख्यातं सविशेषणम् इति वार्तिकं व्याख्यात।

C) **पञ्चसु त्रयाणां समाधानं कुरुत–** 5x3=15

1) स्थानिवद्सूत्रे विधिग्रहणप्रयोजनम्।

2) लोटादेशे शाभावजभावधित्वहिलोपैत्वप्रतिषेधः।

3) अचः परस्मिन्नित्यत्र भावाभावातिदेशः इति प्रतिपादयत।

4) न पदान्तेति सूत्रे लुकि उदाहरणं प्रदर्शयत।

5) समर्थसूत्रस्य परिभाषात्वं यथाभाष्यं निरूपयत।

D) **द्वयोः एकस्य समाधानं कुरुत–** 10x1=10

1) स्थानिवत्सूत्रं सदलप्रयोजनं प्रतिपाद्य भाष्यदिशा निराकुरुत।

2) अर्थानादेशनस्य कारणानि।

***

RKMVU/Int MA/San/11–16/D2014/SK–243 Supplementary

## SK–243 – महाभाष्ये 8, 9 आह्निकानि समर्थाह्निकं च

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

**A) द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः–** 1x10=10

1) स्थानिवत्सूत्रे विधिग्रहणस्य किं फलम्।

2) अपवादे उत्सर्गकृतं न भवतीत्यत्र किं ज्ञापकम्।

3) कुत्र स्नन्तस्य प्रतिषेधः वक्तव्यः।

4) अचः परस्मिन्निति सूत्रेण कीदृशः अतिदेशः विहितः।

5) संयोगस्य कुतो न दोषः।

6) एकादेशस्य कुतः उपसंख्यानं कर्तव्यम्।

7) पारिखीयः इति कस्योदाहरणम्।

8) पूर्वत्रासिद्धे न स्थानिवदिति स्वीकृते सूत्रे केषां पाठः त्यक्तुं शक्याः।

9) जग्ले, मग्ले इत्यत्र कथं दोषनिवारणम्।

10) समर्थग्रहणं किमाश्रत्य भाष्यकृता प्रत्याख्यातम्।

11) एकतिङ्वाक्यमित्यस्य किमुदाहरणम्।

12) महाकष्टश्रितः इत्यत्र कथं विग्रहः।

**B) सप्तसु पञ्चानामुत्तरं लिखत–** 3x5=15

1) अनल्विधावित्यत्र उत्तरपदसमासाश्रयणस्य किं प्रयोजनम्।

2) सिद्धं तु लौकिकवैदिकेष्वभुतपूर्वेऽपि स्थानशब्दप्रयोगात्।

3) आम्विधौ च।

4) पूर्वमात्रस्येति चेदुपधाह्रस्वत्वम्।

5) प्रयोजनं क्सलोपः क्सलोपे इति वार्तिकं वर्णयत।

6) व्यपेक्षासामर्थे परिभाषायां च के दोषाः ।

7) अगुरुपुत्रादीनाम्।

C) **पञ्चसु त्रयाणां समाधानं कुरुत-** 5x3=15

1) स्थानिवद्भावस्य ज्ञापकसिद्धत्वं प्रतिपादयत।

2) आहिभुवोरीट्प्रतिषेधः।

3) अच प्रस्मिन्नित्यत्र अच्ग्रहणप्रयोजनम्।

4) न पदान्तसूत्रे यलोपोदाहरणम्।

5) नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधाः।

D) **द्वयोः एकस्य समाधानं कुरुत-** 10x1=10

1) अपरविधाविति तु।

2) समर्थपदप्रत्याख्यानं विवृणुत।

***

RKMVU/Int MA/San/10-15/D2014/SK-257

## **SK**-257 - परिभाषेन्दुशेखरः 51-133 परिभाषाः

**कालावधिः - होराद्वयम्** **पूर्णाङ्काः** - 50

---

A) **द्वादशसु दश समाधत्त।** **1x10=10**

1) वार्णादाङ्गं बलीयः, इदं नित्यमनित्यं वेति।

2) अल्लोपोऽनः इति सूत्रे तपरकरणं किमर्थमस्ति।

3) असिद्धपरिभाषया जातेऽन्तरङ्गे बहिरङ्गस्यासिद्धत्वं बोध्यते नवेति।

4) नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इत्यस्यावतरणं किमस्ति।

5) पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशो न इत्यस्य ज्ञापकं किमस्ति।

6) विनापि विरोधं सत्यपि सम्भवे बाधकत्वं कः इच्छति।

7) सामान्यातिदेशे विशेषानतिदेशः, इति नित्यमनित्यं वेति।

8) अबाधकान्यपि निपातनानि, इति भाष्यसम्मतमस्ति नवेति।

9) स्वरविधौ व्यञ्जनमविद्यमानवत् इत्यस्य ज्ञापकं किमस्ति।

10) हलस्वरविधौ व्यञ्जनमविद्यमानवत् इत्यस्य ज्ञापकं किमस्ति।

11) तद्गुणसंविज्ञानबहुब्रीहिः कुत्र भवति।

12) चानुकृष्टं नोत्तरत्र इदं नित्यमनित्यं वेति।

B) **सप्तसु पञ्च समाधत्त।** **3x5=15**

1) तन्मध्यपतितस्तद्ग्रहणेन गृह्यते, इत्यस्य व्याख्या कार्या।

2) समासान्तविधिरनित्यः इत्यस्य व्याख्या कार्या।

3) विधौ परिभाषोपतिष्ठते नानुवादे इत्यस्य खण्डनं कुर्वन्तु।

4) नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इत्यस्य यथाग्रन्थं खण्डनं लिखन्तु।

5) एतत्प्रवृत्तौ च निमित्तविनाशसम्भावनापि निमित्तम् इति ग्रन्थस्याशयं लिखन्तु।

6) यत्तु समर्थग्रहणेनान्तरङ्गपरिभाषाया अनित्यत्वमेव ज्ञाप्यते, इति मतं खण्डयन्तु।

7) पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् इत्यस्य व्याख्या कार्या।

C) **पञ्चसु त्रीन् समाधत्त।** **5x3=15**

1) समर्थानां प्रथमाद्वा इतिसूत्रस्थसमर्थग्रहणं कस्य ज्ञापकमस्ति इति यथाग्रन्थं लिखन्तु।

2) अत्र षत्वतुकोः इति सूत्रस्थतुग्ग्रहणं ज्ञापकम् इति ग्रन्थतात्पर्यं प्रतिपादयन्तु।

3) पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् इत्यस्य सावतरणं व्याख्यानं लिखत।

4) मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इत्यस्य सावतरणं व्याख्यानं कुर्वन्तु।

5) प्राचीननयानुसारं वार्णादाङ्गं बलीयः इत्यस्य ज्ञापनप्रकारं प्रतिपादयन्तु।

D) **द्वयोरेकं समाधत्त।** **10x1=10**

1) प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, इत्यस्य व्याख्या कार्या।

2) नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः, इत्यस्यावतरणं प्रतिपाद्य, तस्य ज्ञापकं तुग्ग्रहणं षत्वग्रहणं वेति यथाग्रन्थं प्रतिपादयन्तु।

***

## **SK**–265 – लघुशब्देन्दुशेखरे आदितः न पदान्तद्विरिति सूत्रं यावत्

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

A) **द्वादशप्रश्नेषु दशप्रश्नाः समाधेयाः।** 1x10=10

1) अइउण् इत्यादीनां कथं संज्ञासूत्रत्वम्।

2) सह एति गच्छति सहेता इति विग्रहे कस्माद्धातोः तृच् प्रत्ययः।

3) अनुबन्धानामनेकान्तत्वे उपदेशपदेन किं वार्यते।

4) दीक्षितमते उपदेशशब्दार्थः कः।

5) ऊकाल इत्यत्र ऊ इत्यनेन किं लक्ष्यते।

6) नासिकायाः स्थानत्वे कङयोः कुतः न सावर्ण्यम्।

7) प्रयत्नमित्यपपाठः। कुतः।

8) पूर्वत्रासिद्धे विप्रतिषेधः कुतः न प्रवर्तते।

9) इको गुणवृद्धीपरिभाषायाः लिङ्गं किम्।

10) आद्यन्तौ इति कस्यापवादः।

11) तस्मिन्नित्यत्र सप्तमी किमर्थम्।

12) अलोन्त्यपरिभाषया किं नियमयते।

B) **सप्तसु पञ्चानामुत्तरं लिखत।** 3x5=15

1) योगविभागकरणे कुतो न सूत्रभेदः।

2) अइउण् इत्यत्र कुतो न वर्णेभ्यः विभक्त्युत्पत्तिः।

3) तस्मिन्नित्यस्य षष्ठीप्रकल्पकत्वपक्षः कुतः एकदेश्युक्तिः।

4) उकालो ह्रस्वेति वाक्ये कस्माद्दीर्घादीनां ग्रहणं न।

5) यावत्स्थानसाम्याभावेऽपि कङयोः कथं सावर्ण्यम्।

6) आद्यन्तावित्यत्र कथं यथासंख्यासूत्रप्रवृत्तिः।

7) अलोऽन्त्यपरिभाषायाः लिङ्गं किम् तेन किं प्रयोजनम्।

C) **पञ्चसु त्रयाणां समाधानं कुरुत।** 5x3=15

